27-04-2021

अनिवार्य पत्रमपत्रम् । उपशास्त्री

संस्कृतानुवाद: →

संस्कृत में अनुवाद करने के लिए शब्दरूप, धातु रूप, कारक / विभक्ति प्रकरण, सन्धि, समास, लिङ्ग, वचन, उपसर्ग, प्रत्यय, वाच्य तथा शब्दकोश आदि का ज्ञान होना परमावश्यक होता है। छात्रों को चाहिए कि अधिक से अधिक शब्दरूप तथा विभिन्न लकारों में धातुरूप याद रखें। पर्यायवाची शब्दों को कण्ठस्थ करें। कारक / विभक्ति प्रकरण के अधिकाधिक सूत्रों का ज्ञान रखें। तब संस्कृतानुवाद करना सरल हो जाता है। वाक्य में कर्ता के पुरुष तथा वचन का ज्ञान निम्नांकित सारिणी में स्पष्ट देखा जा सकता है →

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष → | सः, सा, रामः, सीता, गौ, अश्वः, पत्रम्, पुस्तकम्, कलत्रम्, छात्रः, छात्रा आदि: | तौ, ते, रामौ, सीते, गावो, अश्वौ, पत्रे, पुस्तके, कलत्रे, छात्रौ, छात्रे आदी | ते, ताः, रामाः, सीताः, गावः, अश्वाः, पत्राणि, पुस्तकानि, कलत्राणि, छात्राः आद्यः |
| मध्यम पुरुष | त्वम् / त्वं | युवाम् / युवां | यूयम् / यूयं |
| उत्तम पुरुष | अहम् / अहं | आवाम् / आवां | वयम् / वयं |

शेष अगले दिन।

27-04-21

डॉ० निर्मल कुमार झा (स० प्राचार्य, रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

27-04-2021

अनिवार्यपत्रम् । शास्त्री II

व्याकरण के छात्र हेतु (साहित्यम्) । रघुवंशम् । श्लोकव्याख्या ।

" पराद्र्ध्यवर्णास्तरणोपपन्नमासेदिवान् रत्नवदासनं सः ।
भूयिष्ठमासीदुपमेयकान्तिर्मयूरपृष्ठाश्रयिणा गुहेन ॥"

प्रस्तुतोऽयं श्लोकः महाकविकालिदासविरचितस्य रघुवंशमहाकाव्याद् षष्ठसर्गात् इन्दुमतीस्वयम्वरवर्णनादुद्‌गृहीतोऽस्ति

आसने उपविष्टः अजः मयूरपृष्ठे पक्षीविशेषे आसीनः स्वामिकार्तिकेयसदृशः प्रतिभाति ।

अन्वयः → पराद्र्ध्यवर्णास्तरणोपपन्नं रत्नवद् आसनम् आसेदिवान् स मयूरपृष्ठाश्रयिणा गुहेन भूयिष्ठम् उपमेयकान्तिः आसीत्

शब्दार्थः व्याकरणञ्च → पराद्र्ध्यवर्णाः + आस्तरणम् + उपपन्नम् = पराद्र्ध्याः वर्णाः यस्य तत् पराद्र्ध्यवर्णः, तच्च आस्तरणम्, तेन च उपपन्नम्, तत् पराद्र्ध्यवर्णास्तरणोपपन्नम् = श्रेष्ठनीलपीतादिवर्ण वस्त्रसङ्गतं । रत्नवत् = माणिक्यादिरत्नजटितम् । आसनम् विष्टरम् । आसेदिवान् = उपविष्टान् । सः = अजः । मयूरपृष्ठाश्रयिणा = बर्हिपृष्ठोपविष्टेन (मयूरस्य पृष्ठम् आश्रयी इति मयूरपृष्ठाश्रयी, तेन) । गुहेन = कार्तिकेयेन । भूयिष्ठम् = अत्यर्थम्, अधिकम् । उपमेयकान्तिः = शोभोपमे आसीत् = बभूव ।

अस्मिन् श्लोके शृङ्गाररसः, वैदर्भीरीतिः, माधुर्यगुणः; उपमालङ्कारः, उपजातिवृतञ्च ।

27-04-2021

डॉ॰ निर्मल कुमार झा, (स॰ प्राचार्य)
राधा-उमाकान्त संस्कृत महावि॰ सुखसेना, पूर्णियाँ

27-04-2021

शास्त्री I

अनिवार्य प्रथमपत्रम् ।

(साहित्य प्रतिष्ठा)

व्याकरणेतर छात्रेभ्यः

पारिभाषिक शब्दाः ।

1. उपधा → "अलोऽन्त्यात्पूर्व उपधा ।"
अन्त्यादलः पूर्वो वर्ण 'उपधा' संज्ञः । यथा →
सखान् > स ख् आ न् । अत्र शब्दस्वरूपस्यान्ते
नकारः, नकारस्य पूर्व वर्ण आकारस्य (आ)
उपधा संज्ञा ।

2. संयोगः → "हलोऽनन्तराः संयोगः ।"
अज्भिः अव्यवहिता हलः 'संयोग-सञ्ज्ञाः' स्युः ।
तात्पर्यं स्वरवर्णेन व्यवधानरहिताः हलः संयोगसंज्ञकाः
भवन्ति । यथा → इन्द्रः, अस्मिन् पदे नकार, दकार
तथा रकारस्य संयोग संज्ञा अस्ति ।

3. पदम् → "सुप्तिङन्तं पदम् ।"
सुबन्तं तिङन्तं च 'पदसंज्ञं' स्यात् ।
सुप् प्रत्ययान्तं तथा च तिङ् प्रत्ययान्तं शब्दस्वरूपस्य
पद संज्ञा भवति । यथा → राम सु > रामः ।
√भू + तिप् > ति = भवति ।

4. गतिः → 'गतिश्च ।' प्रादयः क्रियायोगे गति संज्ञाः स्युः । यथा →
अनु + √भू = अनुभवति, इत्यत्र √भू धातुना सह
अनु उपसर्गस्य योगः, अन्वत्र गति संज्ञकः ।

27-04-21

डॉ० निर्मल कुमार झा, स० प्राचार्य ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

27-04-2021

शास्त्री III

( साहित्य प्रतिष्ठा )

अष्टपत्रम् ।

मालविकाग्निमित्रम् । श्लोकव्याख्या ।

"पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः ।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य ॥"

पद्यमिदं महाकविकालिदासस्य कृतस्य नाटकस्य मालविकाग्निमित्रस्य प्रथमोऽङ्कात् गृहीतमस्ति । एषा गणदासनाटकाचार्यस्य उक्तिः । तन्मते → यथा मेघस्य जलं समुद्रशुक्तौ पतित्वा मौक्तिकं भवति तथैव विशिष्टपात्रेषु दत्ता शिक्षा उत्कर्षं प्रकटयति ।

अन्वयः → पयोदस्य समुद्रशुक्तौ न्यस्तं जलं मुक्ताफलताम् इव आधातुः शिल्पं पात्रविशेषे न्यस्तं गुणान्तरं व्रजति ।

शब्दार्थाः व्याकरणञ्च → पयोदस्य = जलदस्य । पयः ददाति इति पयोदः तस्य । समुद्रशुक्तौ = सामुद्रिक शुक्तिकायां । समुद्रस्य शुक्तिः समुद्रशक्तिः तस्याम् । न्यस्तं = निहितं । जलम् = पानीयम् । मुक्ताफलताम् = मौक्तिकत्वम् । मुक्ताफलस्य भावः मुक्ताफलता ताम् । इव = सदृशम् । आधातुः = उपदेशकस्य । शिल्पम् = कला, विद्या । पात्रविशेषे = विशिष्टे शिष्ये । पात्रेषु विशेषः पात्रविशेषः तस्मिन् । गुणान्तरम् = गुणातिशयम् । अन्यः गुणः गुणान्तरः तम् गुणान्तरम् । व्रजति = प्रतिपद्यते । अस्मिन् श्लोके उपमालङ्कारः ।

27-04-21

डॉ० निर्मल कुमार झा, स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ